National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 189-191
© 2025 NJHSR
www.sanskritarticle.com

**रामकिशन शर्मा**
शोधच्छात्रः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नई दिल्ली

**Correspondence:**
**रामकिशन शर्मा**
शोधच्छात्रः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नई दिल्ली

# श्रौतयागस्य वैदिकसाहित्ये स्वरूपम्

**रामकिशन शर्मा**

**शोधसारांश:** - श्रौतयागाः वैदिकधर्मे प्रधानमेव विद्यते। एते यागाः वेदेषु, विशेषतः संहितासु, ब्राह्मणेषु च विशदं वर्णिताः सन्ति। यत्र यज्ञः इत्युक्तं दृश्यते, तत्र प्रायः श्रौतयाग एव लक्ष्यार्थः। श्रौतयागाः अग्निष्ठोमादयः सोमयागाः, दर्शपूर्णमासादयः पञ्चमहायज्ञाः, अग्निचयनादयः च बहुधा विभागतः संस्तुताः। एषां यागानां नियमनं मन्त्रब्राह्मणादिभिः कृतमस्ति।

वैदिकसाहित्ये यागानां स्वरूपं बहुधा मन्त्रैः स्तोत्रैश्च प्रतिपाद्यते। ऋग्वेदे मुख्यतः स्तोत्ररूपेण यज्ञदेवताः प्रशस्यन्ते, यजुर्वेदे तु यज्ञीयक्रियायाः विधयः मन्त्राश्च उपदिष्टाः, सामवेदे सामगानरूपेण यज्ञस्य भावविस्तारणं दृश्यते, अथर्ववेदे च यज्ञस्य फलाभिलाषिणः मन्त्राः सन्ति। एतत् सर्वं श्रौतयागस्य गम्भीरं स्वरूपं निरूपयति।

ब्राह्मणग्रन्थेषु विशेषतया यज्ञकर्मणः विस्तारपूर्वकं विवेचनमस्ति। तत्र यज्ञाङ्गानि, हवनक्रियाः, यूपनिर्माणम्, द्रव्यव्यवस्था, ऋत्विक्परिग्रहः, होमकलाः, तथा च यज्ञस्य फलश्रुतयः स्पष्टतया प्रतिपादिताः। शतपथब्राह्मणे, ऐतरेयब्राह्मणे, तैत्तिरीयब्राह्मणे च अनेकेषां श्रौतयागानां विधयः श्रूयन्ते।

एवं वैदिकसाहित्ये श्रौतयागाः केवलं धार्मिककर्मरूपेण न दृश्यन्ते, किन्तु ते ब्रह्माण्डस्य ऋतस्य च धारकत्वेन अपि प्रतिपाद्यन्ते। यज्ञ एव ऋतस्य प्रकटः स्वरूपमिति भावः बहुधा मन्त्रेषु दृष्टः। तस्मात् श्रौतयागाः वैदिकजीवनस्य, तत्त्वदर्शनस्य च मूलाधारभूताः। एष एव श्रौतयागानां वैदिकसाहित्ये स्वरूपम्।

**कूटशब्दाः** - श्रौतयागः, वैदिकसाहित्यं, यज्ञः, होमः, यूपः, द्रव्यव्यवस्था।

वैदिकयुगे यज्ञसम्पादनमेव धर्मस्य मुख्यम् उद्देश्यमस्ति। यज्ञस्य सूक्ष्मातिसूक्ष्मतरानुष्ठानेभ्यः ब्राह्मणग्रन्थेषु सविस्तरं वर्णनं प्राप्यते। एतेषां विधीनां पूर्णनिर्वाहाय विशेषाग्रहः परिदृश्यते। अग्नेः स्थापना कदा करणीया? केन विधिना कर्त्तव्या? आज्यस्थाहुतिः वेद्यां कुत्र स्थातव्या? वेद्यामुपरि आस्तरणाय कुशाग्रभागं पूर्वाभिमुखम् उत उत्तराभिमुखं भवितव्यम्? इत्यादीनां प्रश्नानां विवेचनम् अतिसूक्ष्मः, विस्तृतश्चास्ति । समस्तेषु कर्मसु यज्ञ एव श्रेष्ठतमः । उक्तमपि -

**महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम्।**
**यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः।।**[1]

उत्पत्तिक्रमे स्थावर-जङ्गम-जीवाजीवानाञ्चोत्पत्तिरभवत्। एतेषां सन्तुलनं विशिष्टनियमानुसारमेव दरीदृश्यते। साक्षात् कालनियामकभेदेन ज्ञायते यत् उत्पत्तिः स्थितिः विनाशोपरि च सन्तुलनमस्य विधीयते। एषः नियमः सर्वेषु प्राणिषु अप्राणिषु दृश्यते। येषामुत्पत्तिर्भवति ते किञ्चित् कालपर्यन्तं स्थित्वानन्तरं विनाशं प्रति गच्छन्ति। मानवानामपि एतादृशी गतिः भवति। उत्पत्ति-स्थिति-विनाशात्मकजीवनविषये चिन्तनमवश्यं करणीयमस्माभिः। सनातनधर्मविषयकग्रन्थेषु सृष्टिचक्रबोधनार्थं धर्मसंस्थापनार्थञ्च मानवोपकारकाय विभिन्नधर्मपथाः प्रदर्शिताः। श्रुतिस्मृतिग्रन्थेषु आचारव्यवहार-

प्रायश्चित्तादिविषये वर्णाश्रमभेदेन स्त्रीपुंसयोः धर्माः विवेचिताः। तत्र चतुर्वाश्रमेषु जप-तप-व्रत-यज्ञकर्मानुष्ठानानामिहलोके परलोके च महद् फलं वर्तते। मनुष्यः धर्मपालनं कृत्वा कर्मबन्धनेन मुक्तो भवति तदैव ब्रह्मसाक्षात्कारः सम्भवति। मनुनोक्तं यत्-

**सम्यग् दर्शनसम्पन्नः कर्मभिर्न निबध्यते।**
**दर्शनेन विहीनस्तु संसारं प्रतिपद्यते।।**[2]

अर्थात् धर्माधर्मफलं ज्ञात्वा स्वधर्मपालनं कृत्वा कर्मस्थासक्तिं त्यक्त्वा सम्यग्दर्शनसम्पन्नो भूत्वा ईश्वरसाक्षात्कारकरणाय प्रयत्नं कुर्यात्। एवं विधानेन सम्यग्दर्शनसम्पन्नजनः कर्मभिर्न निबध्यते। विपरीतमेतदिह संसारे जन्ममरणचक्रे प्रत्यावर्तिर्भवति। "ऋणणानि त्रीण्यप्राकृत्य मनो मोक्षे निवेशयेत्"[3] इति मनुवचनानुसारं पितृऋण-देवऋण ऋषिऋणैः उऋणं भूत्वा मोक्ष प्राप्नोति अतः यज्ञेन देवेभ्यः, प्रजया पितृभ्यः, स्वाध्यायेन ऋषिभ्यः, ऋणं संशोध्य मनो मोक्षे निवेशयेत। अतः यज्ञेन देवऋणात् मुच्यते। **"अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छेत् व्रजत्यधः।।'**[4] मनुवचनस्याशयोऽस्ति यत् यः यज्ञकर्माणि विहाय मोक्षमिच्छति स अधोगतिं प्राप्नोति। जनाः सम्यक् विधानेन यज्ञस्वरूपं यज्ञविधानं महत्वञ्च ज्ञात्वा यज्ञकर्मानुष्ठाने रताः भवेयुः।

विज्ञाने इति धातूनां उत्तपन्नोयम् वेदशब्दः स च पूर्वोत्तरभागेण द्विधा विभक्तः तत्र वेदस्य पूर्वभाग उद्देश्येन प्रवृत्ता पूर्ववैदिक उत्तरभागोद्देश्येन प्रवृत्ता उत्तरवैदिक, पूर्ववैदिक साहित्यस्य यागादिरेव धर्मः इति परमसिद्धान्तः। एव च वेदबोधित स्वर्गादिश्रेयः फल साधनताको धर्मः इति मीमांसकाः अङ्गीकुर्वन्ति। तत्र सर्वेषां यागानां प्रकृतिः ज्योतिष्टोमः, सर्वासां इष्टिनां प्रकृतिः दर्शपूर्णमासः, सर्वेषां पशूनां यागानां प्रकृतिः अग्नीषोमीय तद्वेदेव श्रौतयागेषु वैदिकशास्त्रं उपकारकं भवति, यथा-

**धर्म प्रमिय मानेहि वेदेन करणात्मना।**
**इति कर्तव्यता स्थानं वैदिक पूरयिष्यति॥**

अनेन ज्ञायते किं कर्तव्यं कथं कर्तव्यं केन कर्तव्यं इत्याकांशात्रयं पूरयिष्यति। अतः वैदिकशास्त्रं विना श्रौतयाग कल्पनं नोचितम्। किमर्थम् इत्युक्ते अत्र प्रमाणं, भेदः, शेष, प्रयुक्तिः, क्रमः, अधिकारः, सामान्यः, विशेष अतिदेशः, ऊह, भेद, तन्त्र, प्रसङ्गश्चेति द्वादशविषयाः अत्र प्रतिपाद्यन्ते। अतः श्रौतयागेषु वैदिकसाहित्यस्य उपयोगिता इत्यनयोः उपकार्य उपकार सङ्गतिः।

श्रुतिः अर्थात् वेदस्य संहितायाः मन्त्राः एवं ब्राह्मणस्य च मन्त्राः इति अंशद्वयस्य नाम भवति। एतयोरुभयोरपि अथवा एकस्मिन् अपि येषां यज्ञानां सांगोपाङ्गवर्णनं कृतमस्ति तेषामेव यागानां नाम "श्रौतयज्ञाः" इति संज्ञा प्रसिद्धा। श्रौतकल्पे 'यज्ञः' एवं 'होमः' इति पदद्वयं भवत। यस्मिन् प्रयोगे स्थित्वैव 'वषट् कारशब्देन आहुतिः दीयते एवं याज्यापुरोनुवाक्ययोः पाठः क्रियते तस्य "यागः" अथवा "यज्ञः" इति संज्ञा भवति, यस्मिन् च उपविश्यैव अनुष्ठानं क्रियते तस्य संज्ञा "होमः" इति भवति। श्रौतयागेषु इष्टियागाः, पशुयागाः एवं सोमायागाः एताभिः संज्ञाभिः मुख्यतया त्रिधा विभाक्ताः सन्ति। श्रौतयज्ञानां विधानस्य एका स्वतन्त्रा परंपरास्ति तस्य प्रयोगपरंपरायाः पूर्णतयोल्लेखो यत्र समुपलभ्यते तस्य एव नाम भवति 'प्रकृतियागः' यतोहि "यत्र समग्राङ्गोपदेशः सा प्रकृतिः" इति भणन्ति। मीमांसकाः, एवं च यत्र केवलं विशेषाणाङ्गानामेवोपदेशो क्रियते तस्य नाम उक्तमस्ति 'विकृतियागः' इति। एवं श्रौतयज्ञानां त्रिषु मुख्यभेदेषु क्रमशः दर्शपूर्णमासेष्टिः, अग्निषोमीयपशुयागः एवं ज्योतिष्टोमसोमयागः एते प्रकृतियागाः सन्ति। अर्थात् एतेषु प्रयोगेषु न केनापि अन्य कर्मणः विधिः गृह्यते। एतेषां प्रकृतियागानां ये धर्मग्राहिणः विकृतियागाः तेऽनेकाः सन्ति तेषामियत्तायाः संकलनं भिन्न-भिन्न शाखानां श्रौतसूत्रेषु कृतमेवास्ति। अत्र परिचयं विनैव तेषां नामगणनमरोचक-मेवमनुपयुक्तभविष्यत्। अतः श्रौतयज्ञानां सर्वासामान्यपरिचयः इत्थमवगन्तव्यम्

**श्रौतयज्ञाः-** आहवनीयः, गार्हपत्यः, दक्षिणाग्निः एतेषु त्रिष्वग्निषु अनुष्ठीयते अत एव एतेषां नाम "नेताग्नयः" इति त्रिणाचिकेतस् उपनिषत्सु च भवति। प्रायः सर्वेषु अपि श्रौतयज्ञेषु प्रत्यक्षेण उत अप्रत्यक्षेण, न्यूनाधिक्येन वा वेदत्रयानामुच्चारणं भवत्येव, अत एव श्रौतयज्ञाः 'त्रयी' साध्या सन्ति। एतेषु यजमानः स्वयं शारीरिकक्रियासु तावत् व्यस्तो न भवति यावदन्ये ब्राह्मणाः येषां संज्ञा यज्ञे "ऋत्विज्" इति भवति ते कार्येषु संलग्नाः भवन्ति। श्रौतयज्ञानामिष्टियागस्यानुष्ठानं प्रायः चत्वारो ब्राह्मणाः भवन्ति। इष्टियागे अन्नमयप्रधानरूपेण हविः अर्थात् देवानां देयं द्रव्यं भवति। पशुयागेषु च प्रधानरूपेण "पशुः" इति हविः भवति। सोमयागे प्रधानहविरूपेण "सोम" इति हविः भवति। सोमयागस्य महान् यज्ञः सत्रयागः एवम् अहीनयागः इति नाम्नः कथ्यते। सत्रयागे ब्राह्मणजातेः सप्तदश तः चतुर्विंशतिः पर्यन्तं आहिताग्निनः वैदिकाः एव भवति। एतेऽपि यजमानाः भवन्ति। एवञ्च एतेष्वेव षोडशब्राह्मणाः "ऋत्विजः" कार्यं कुर्वन्ति। एतेषु दक्षिणा नैव दीयते एवं यज्ञस्य संपूर्ण फलं सर्वैः समानं प्राप्यते। अहीनयागे एको वा अनेके अग्निहोत्री यजमानाः भवितुमर्हन्ति। परन्तु एतेषु ते "ऋत्विजः" भिन्नाः भवन्ति यैः दक्षिणा दीयते। अस्य अहीनयागस्य फलं केवलं यजमानैः एव प्राप्यते॥

पूर्वतन प्रयोगे कुर्वन् समये ये सन्देहाः आसन्, तेषु सन्देहस्थानेषु, तान् सन्देहान् दूरीकर्तुं शास्त्रकारैः एकं स्वतन्त्रं शास्त्रं निर्मितं तस्य साहित्यस्य नाम पूर्ववैदिक इति कथ्यते, पूर्ववैदिक साहित्यस्य प्रतिपाद्य विषयः भवति, एकमात्र यज्ञप्रक्रिया एव।

एवञ्च **'माङ् माने'**[5] इत्यस्मात् धातोः 'मनोर्जिज्ञासायाम्' इति वार्तिकवचनानुसारं जिज्ञासार्थे मान्वधादाशाभ्यो दीर्घश्चाभ्यासस्य' इति सूत्रेण "सन्" प्रत्यये विचारार्थे वैदिकशब्दः निष्पद्यते। अभ्यास्येकारस्य दीर्घ च कृते ततः अप्रत्यये टापि च कृते अयं वैदिक शब्दः निष्पणणः।

एवं वैदिक शब्दस्यार्थः भवति विचारः किन्तु न केवल साधारणो विचारः अपितु "पूज्यपूजित विचारः" तथाचोक्तं वाचस्पतिमिश्रेण "भामति" ग्रन्थेपूजितविचारवचनो वैदिक - शब्दः।

**"परमपुरुषार्थहेतुभूतसूक्ष्मतामर्थनिर्णायफलताविचारस्यपूजितता"** इति।

एवञ्च अस्य साहित्यस्य महत्वं कुमारिणभट्टपादैः अपि वर्ण्यते -"वैदिक शास्त्रतेजोभिर्विशेषेणोज्वलीकृते वेदार्थज्ञानरत्ने मे तृष्णातीव विजृम्भते।[6]

तथा च श्रौतस्मार्त प्रयोगानुष्ठान सिद्ध्यर्थं वैदिकशास्त्रं-विना नान्यः पन्थः उपपद्यते। अतः श्रौतेषु वैदिकशास्त्र-स्योपयोगिता निरूपयिष्यते -

अधीत वेद-वेदाङ्मेव वैदिकशास्त्राध्ययने अधिकारी भवति, तद्वदेव" श्रौतकर्मणि कृतदारेण आहिताग्निना श्रौतकर्माणि - अनुष्ठेयानीति शास्त्रसिद्धान्तः"। एवं च कः आहिताग्निः इत्युक्ते-

**"श्रुतिविहितमाधानं योनुतिष्ठति सः भवति"**[7] अतः ज्ञायते वैदिकशास्त्रं विना श्रौतयागादिकं न सम्भवति।

वैदिकशास्त्रं वेदवाक्यार्थज्ञानं बोधयति। एवं वेदार्थज्ञानं विना श्रौतकर्मानुष्ठानं न सिद्ध्येत्। यथा- **"वेदं कृत्वा वेर्दि करोति"**[8] इति श्रुतिवाक्यम्। "क्षुते" आचामेत् इति स्मृतिः। तत्र सोमायागे अथवा दर्शपूर्णमासे- **"वेदीकरण प्रतियोगिकमानन्तर्यं वेदीकरणवृत्तिः"**[9] अत्र वेदोनाम दर्भमुष्टि विशेषः। वेदी नाम- आहवनीय गार्हपत्ययोर्मध्ये चतुरङ्गला काथा भूमिः।

अत्र वेदकरणानन्तरं यदि क्षुत् आगच्छति चेत् किम् आचमणं कर्तव्यं वा श्रुतिवाक्याधारेण वेदीकरणं कर्तव्यं वा इति जिज्ञासे सति। प्रथमं आचमणं कृत्वा (स्मृतिवाक्याधारण) अनन्तरं वेदीकरणं कर्तव्यम्। इति श्रुतिस्मृत्ययोर्विरोधे

कदाचित् स्मृतेः प्राबल्यं स्वीकारे शिष्टाः कृद्धाः न भवन्ति तदैव् निरूपितं भगवता जैमिनिना प्रथमाध्यायस्य चतुर्थपादे 'शिष्टाकोपअधिकरणे'। अनेन श्रौतयागेषु अस्य साहित्यस्य महत्वम् अधिगम्यते।

तद्वदेव **"सामर्थ्याधिकरणे"**[10] 'सुवेणावद्यति' 'स्वधितिना-वद्यति' 'हस्तेनावद्यति' इति वाक्ये प्राप्ते क्रमशः घृत, मांस, पुरोडाश अवधानं निर्दिष्ट प्रकारेणैव कर्तव्यं वा अनियमात् यथाकच्यै कर्तव्यम्... इति जिज्ञासायाम्।

आज्य, मांस, पुरोडाशस्यावधानं निर्दिष्ट प्रकारेणैव कर्तव्यम्। तत्र कारणम् अस्ति "सामर्थ्यम्"।

घृतस्यावधाने स्वधितेः सामर्थ्य नास्ति। एवं च मांसावधाने हस्ते सामर्थ्य न, अतः सामर्थ्यरूप प्रमाणेन घृत, मांस, पुरोडाशावधानं, सुवा, स्वधिति, हस्तेनैव कर्तव्यम् इति प्रतिपादितम्। अनेन श्रौतयागेषु वैदिकसाहित्यस्य उपयोगिता दरी दृश्यते।

तद्वदेव **'दध्ना जुहोति'**[11] इत्यत्र दधिरूप गुणस्य होमोद्देशेन विधानं कृतम्। किन्तु अत्र दध्यानयनं आमीक्षार्थं वा वाजिनार्थं वा?

अत्र दध्यानयनं आमीक्षार्थं न तु वाजिनार्थम्। वाजिनम् तु अनुनिष्पन्नम्। अतः अत्र आमीक्षा एव प्रयोजिका इति साधितम्। अनेन श्रौतयागेषु द्रव्यानयनस्योद्देश्यम् अवगम्यते। एतदेव अस्य साहित्यस्य श्रौतयागेषु महत्त्वं वर्तते।

एवं च अधिकारनिरुपणावसरे **"दम्पत्योः सहाधिकारः"**[12] निरूपणावसरे श्रौतयागेषु केवल पुंसामेव अधिकारः उत दम्पत्योः सहैव अधिकारः इति जिज्ञासायाम् -

**"संपत्तीपत्यासकृतेन गच्छताम्"**[13] इत्यनेन वाक्येन अवगम्यते यत् दर्शपूर्णमासादि श्रौतकर्मानुष्ठानं दम्पतिना एव कर्तव्यम्। एवं च पृथक् पृथक् कार्य क्रियते चेत् क्रतु वैगुण्यं स्यात्। अनेन फलापूर्व न सिद्ध्येत्। फलापूर्वाभावे अनुष्ठानफलं न मिलति अतः दम्पतिना एवं अनुष्ठातव्यं इति सिद्धान्तितम्।

एतादृशं उदाहरणेन अवगम्यते यत् वैदिकशास्त्रं विना श्रौतकर्मानुष्ठानं न सिद्ध्यति वैदिकसाहित्यस्य उपयोगः श्रौतयागेषु अपेक्षते एव। नो चेत् एतदनन्तरं किं कर्तव्यम्। एतदनन्तरं एतद् कर्तव्यं वा न वा इति विचारः न सिद्ध्यति।

एवं च **"यजमानः प्रस्तरः"**[14] इत्यत्र यजमानः साक्षात् प्रस्तरः इति न अपितु इष्ट्यादिषु यथा प्रस्तरस्य महत्वं वर्तते तद्वदेव यजमानस्य महत्वं इति अर्थवादः कृतः। अतः इत्यादिषु वाक्येषु अवगम्यते श्रौतयागेषु वैदिकसाहित्यस्य अनन्य साधारणं महत्वं अस्ति इति।

**निष्कर्षः -**

एवं दृश्यते यत् श्रौतयागाः वैदिकसाहित्ये परमं स्थानं धारयन्ति। ते केवलं धार्मिककृत्यमात्रं न, अपितु विश्वस्य नैतिकसामंजस्यस्य, ऋतस्य च साक्षात् आधारभूताः। यज्ञैः एव ऋतस्य परिपालनं, देवमनुष्याणां च साहचर्यं सिध्यति। तस्मात् श्रौतयागानां सम्यक् अनुष्ठानमेव वैदिकजीवनस्य मूलं तथा च लोककल्याणस्य कारणं भवति।

**पाद टिप्पणी**: -

[1]श्रीमद्भगवद्गीता 10.25
[2]मनु. 6.74
[3]मनु. 6.35
[4]मनु. 6.37
[5]पा. धा. दिवादिगण
[6]श्लोकवार्तिक-१४
[7]यज्ञतत्वप्रकाश 4.1
[8]मीमांसाशास्त्रम् 1.4.1
[9]मीमांसाशास्त्रम् 5.1.1
[10] मीमांसाशास्त्रम् 1.4.2
[11] अर्थसंग्रह
[12] मीमांसा शा. 6.1.5
[13] मीमांसा शा. 6.1.6
[14] मीमांसा शा. 1.1.4